क्षुषेण त सिख्यायापठितः तद्यथा श्लेशे प्रक्लिश्यंते वर्त्म कंडूमानल्पवेदनः विद्यात्प्रक्लिंन वर्त्मेतिन मिन संन्निपातजमिति तमितत्तवक्ष्यमा
णय क्लिन्नवर्त्मनो वर्त्मातिरम वक्तव्यं प्रक्लिन्नवर्त्मलक्षणमाह यस्य धौताधौतानि संबध्यंते पुनः पुनः वर्त्मान्यपरिपक्कानि विद्यादक्लिन्नवर्त्मनत्
९७ यस्य वर्त्मानि बहिरंतः क्लिन्नानि तथाप्यानद्यंते विलोपदेहेन संलग्नानि भवंतीत्यर्थः पक्कान्यपि धौतानि पूयेन बद्धानि भवंति तन्निरासार्थं
माह अपरिपक्कानीति धौतानि धौतानीति कोर्थः पुनः पुनः प्रक्षालितः निवृहवचनमिह नेत्रद्वयस्य द्वयमिति व्याख्यापनार्थं एतद्विदं
द्विरालक्ष्यया पर्यंतवातहतवर्त्मलक्षणमाह विमुक्तसंधि निश्चेष्टं वर्त्म यस्य निमील्यते एतद्वातहतवर्त्म जानीयादक्षी विंतकः ९९ अक्षविंत
कइति शाल्याकसिद्धांतवेद्यः विमुक्तसंधि वस्थानच्युतं निश्चेष्टं निःक्रियं निमिषोन्मेषरहितमित्यर्थः एतादेव निमिल्यते संकुचिति सरतम
वलंबिका विषमं वर्तुलं ग्रंथिभूतं ग्रंथिरूपेण संस्थितं आवेदनं मल्प वेदनं रक्तमिषल्लोहितं अवलंबितं आश्रमं शीघ्रजन्मयत्रे अन्यप्रवलं
बितेति पाठांतरं अतः सन्निपाताद्दावर्ध्मं तत्कथयेत् निमेषमाहमाह निमेषिणीः शिरावायुः प्रविष्टो वर्त्मसंश्रयाः चालयंति वर्त्मानि
निमेषइतितद्विदुः १०० व्यानो वायु निमेषोन्मेषकारिका शिराः प्रविष्टा वर्त्मानि चालयति शिघ्रं स्खलयति यदुक्तं विदेह वर्त्मस्थायीनि
वर्द्धितं लोहितास्मृदु रक्तार्शं तद्रक्तजं शोणितार्शः छिन्नं छिन्नं प्रवर्द्धते १०१ एतद्रक्तजमसाध्यं तार्शसाध्यं स्यात् रक्तश्राव्यथ रक्तमिति ल
गणलक्षणमाह अपाकी कठिनः स्थूलो ग्रंथिवर्त्मनाह अयोदोषा बहिः शोथं कुर्युः छिद्राणि वर्त्मनो प्रस्रवंत्यो रुद्रके विसवद्विलवर्त्मन
तु ३ शोथं कुर्युः छिद्राण्यपि कुर्युरिति संबध्यते विसवदिति विसं मृणालं यथानेक छिद्रं अभ्यंतरस्थितजलेभ्य वतिन द्वादत्रापि पक्ष्म
कोप स विज्ञेयो व्याधिः परमदारुणः ४ असितं च सितं भागे मूलकोशात्पतंति पक्ष्मकोपः स विज्ञेयो व्याधिः परमदारुणः ४ प्रचालि
तानि लोममूलस्थानात् पतंत्यपीति यस्मानीति शेषः अपिशब्दो त्र पतंत्यपि अयं सन्निपातिजोयाप्यः एवं सुश्रुतोक्त वर्त्मरोगा एकविंश
तिः यदुक्तं सुश्रुते तत्संगीन्यपि कुंभीकायोत्संकी वर्त्मशर्करा यथास्मवर्त्म शुष्कार्शः तथैवांजननामिका बहलं वर्त्म जत्राप्यपि व्याधि वर्त्मनिबंध
कः क्लिष्टकर्दमवर्त्माख्यो श्याववर्त्मतथैव च प्रक्लिन्नपरिक्लिन्नवर्त्म वाहतं च यत् अर्बुदं निमिषश्चापि शोणितार्श्च यस्मृतौ लगणं बि
सनामा च यक्ष्म स्तथैव च एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः इति एवं सुश्रुतोक्ताः षड्विंशति रोगा उक्ताः सग्रंथकारक माधवचर
का चार्येण कस्यापितंत्रेण कस्यापि माधवचरकार्येण यक्ष्मशातकुंचनमाः लक्षणानि लिखितं तत्र पक्ष्मशातकुंचनयोर्लक्षणानि लिखितं तत्र

पक्ष्मशातलक्षणमाह वर्त्मपक्ष्माश्रयगतं पित्तं रोमाणि शातयेत् कंडूं दाहं च कुरुते पक्ष्मशातं तमादिशेत् ६ पक्ष्माशयः पक्ष्ममूलं शातयेत् कटूर
त्रापि कोपि वर्त्मरोगः पक्ष्माणं वर्त्माश्रियेन कुंचनलक्षणमाह वाताद्यावर्त्मसंकोचं जयंति यदा मलाः तदा द्रष्टुं न शक्नोति कुंचनं नाम तद्विदुः
७ मलाइत्यस्य दुष्टत्वप्रतिपादनार्थं मलिनीकारणाद्वातादयः मला उच्यंते कुंचनं विकृतीकरणं ॥ इत्यातंक दर्पणे निदानव्याख्यायां नेत्ररोग
निदानं ॥५ ॥ ॥ शिरसाश्रित श्रवणानासानयनरोगास्तज्जायंते नानभिधाय भूतशिरसो रोगाश्चैकादश भवंति तानाह शि
रोरोगास्तु जायंते वातपित्तकफैस्त्रिभिः ॥ सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा १ सूर्यावर्त्म इवाताभ्यां शंखकोर्द्धावभेदकाः वातपित्तकफै
रित्युक्ते त्रित्वमभ्युपगम्यत एव इत्युक्त स्त्रिभिरिति ग्रहणं सर्वेषां शिरोरोगाणां सन्निपातजत्वाख्यापनार्थं वातादिभिरुत्कर्षात् यदुक्तं
सर्व एव शिरोरोगा तावद्धा विभेदकशंखकेरित्यभिधानमुपपाद्यते तत्र वातिकमाह यस्यानिमित्तं शिरसो रुजश्च संभवतीति त्रानिशि
चातिमात्रं प्रबोधतो पेश्च भवेद्विशेषः शिरोभितापः ससमीरणेन २ अनिमित्तजोनकी तानि मितमिति पित्तवायो विषमक्रियवान्
अत्र तीव्रा शिरोभितापइतिगम्यते निशान्वातिमात्रामिति रात्रौ शेत्यात वायोरधिक्यात् बंधप्रताप्येतिरिति बंधः उष्णीषादिनोपता
पः स्वेदः शिरोभितापको शिरोरुजापेतिकमाह यस्योष्णमंगारचितं तथैव भवेच्छिरो धूमवतीच नासा शीतेन रात्रौ च भवेद्विशेषः शिरो
भितापः सत पित्तकोपात् ३ अंगारचितमिवोष्णं यस्य शिरो भवति नसावृतापि भवति धूप्यतीसंतप्यतीत्यर्थः कफजमाह शिरो मंदं यस्य
कफोपदिग्धं गुरु प्रबंधं च तथा हिमं च शूनाक्षिकूटं वदनं च यस्य शिरोभितापः स कफप्रकोपात् ४ कफोपदिग्धं कफलिप्तं गुरुगौरव
युक्तं प्रबंधं बद्धमिव शूनाक्षिकूटमिति वचनविशेषणं सन्निपातजमाह शिरोभितापे त्रितयप्रवृत्ते सर्वाणि लिंगानि मुहुर्भवंती ५
तृतीयप्रवृत्ते दोषत्रयसंभूते उक्तवातादिलिंगं मुहुर्मुहुर्भवती रक्तजमाह रक्तात्मकः पित्तसमानलिंगः स्पर्शासहत्वं शिरसो भवेच्च
पित्तजशिरोरोगलक्षणं अत्र तु स्पर्शासिहत्वं मधिकं क्षयजमाह रक्तात्मकः पित्तसमानलिंगाः अस्रग्वसाश्लेष्मसमीरणानां शिरोगता
नां सिह संक्षयेण क्षयः प्रवृत्तः शिरसोभितापः कष्टो भवेद्व्यरुजातिमात्रं ६ संशोधनच्छर्दनधूमनस्यैरस्रग्विमोक्षैश्च विवृद्धिमिति वसास्र
जोसर्वगतत्वात् शिरसि स्थितिः कफजस्यस्थानं शिरः उदानवायुरूर्ध्वजंतु विकारकर्तृत्वात् च शिरास्थितानां कफस्य च तस्य च क्षयउग्रर
जत्वं व्याधिप्रभावात् इत्येके उर्ध्वगतत्वात् उर्ध्वविकारकर्तृत्वाच्च शिराभितापाइति शिरोरुजा सवेदन धूम्रतीव्रनस्यैः कफस्य क्षयः न
दरादितीव्रधूमेन मस्तिकवसादिक्षयः अत एव तः संस्वेदनादिभिः क्रमयस्य वृद्धिः अयं विदेहे पठ्यते शून्येभ्रमति रुज्यंते शिरो
वध्यांतनेत्रतो मूर्छामात्रावसादस्य शिरोरोगः क्षयात्मके इति क्रमिजमाह निस्तुद्यते नपश्य शिरोतिमात्रं संभक्ष्यमाणं स्फुरतीव चा

पि घ्राणाकच्छ्रगच्छेत्सलिलंसरक्तंशिरोभितापः कृमिजः सघोरः ८ संभक्षमायामित्यत्रकृमिभिरितिशेषः स्फुरतीवमनाकुलनीवघ्रा
णाच्चगच्छेदित्यत्रचकारेणक्रमयश्चगच्छंतितिद्रष्टव्यं सूर्यावर्त्तमाह सूर्योदयंयाप्रतिमंदमंदमक्षिभ्रुवंरुक्समुपैतिगाढं विवर्द्ध
तेचांशुमतासहैवसूर्यापवृत्तोविनिवर्ततेच ९ सर्वात्मकंकष्टतमंविकारंसूर्यापवर्त्तंतमुदाहरंति ० सूर्योदयंप्रतिलक्षीकृत्यायारुक्
अतर्किताभ्रुवंसंबंधः अक्षभ्रुवोरितिपाठांतरंपठंति तत्रपुत्रोदारत्नोलीनाभवति सूर्यात्मकंसमंदमंदमभ्रत्वासदेतिवर्द्धंतसारुक्
सूर्यापगमेतिवर्तते ससूर्यावर्त्तः गादस्थानेतिगूढपाठांतरं तत्रगुदारात्रोलीनाभवति सूर्यात्मकंसन्निपातजंशुश्रुते अयंवातापि
ताभ्यांपठ्यते तत्कथंसर्वजमिति यथाआवर्तसंज्ञाः सतूसूर्यापूर्वोव्यथितः पितक्षमीरणाभ्यांशीतेनशांतिर्लभ्यते कदाचिद्दुष्टेनजंतु
स्कस्वभास्युयानद्वाइतिपूर्वं दृष्टेत्र्यघोरेषाउच्यते रात्रौकथ्यंननिर्दिश्याविरोधाः नत्वेवंरात्रौकथंसमानगुणाश्रितप्रादुर्भावेवेदनाघटते दि
वासाघंतयाभदरुक्कुत्र्यते अत्रापिप्रितस्यप्रबलमंतत्वात् आनंवातमाह दोषाप्रदुष्टास्त्रयएवमन्यासंपीडयगाढंसरुजांसतीव्रां कुर्वंति
सार्क्षीभ्रुविशंखदेशं स्थितिंअरोत्याक्षुविशेषतस्त १० गंडस्यपार्श्वेतिकरोतिकंथहनुग्रहं लोचनजांश्चरोगान् अनंतवातंतमुदाहरंति
दोषत्रयोद्भुशिरसोविकारं ११ मरुज्जमितिस्वस्वरुजागंडस्यपार्श्वगंडस्यांपांतदेशे शुश्रुतेनानंतवातपलित ज्ञातशिरोरोगाउक्ताः
तत्रांतरदर्शनात् भ्रू० १२ यथारुक्षाशनाध्याशादध्यशनेप्राग्वातश्यावमैथुनैः वेगसंधारणायासव्यायामैः कुपितोनिलः सकफोर्धवग
हीत्वशिरसोनिलः मन्याभ्रशंखकर्णाक्षिललाटार्धतिवेदनं १३ शस्त्रारणिनिभांकुर्यात्तीव्रांसोर्द्धावभेदकः नयनंवाथनाशावमभिवृद्धो
विनाशयेत् १४ इतिअध्यशनेमजीर्णभोजनं प्राग्वातःपुरोवातः अस्ययोनिशीजलं शस्त्राणिनामतिशस्त्रच्छेदननिभाआरणि अग्न्यु
त्यादिकंकाष्टयंत्रंतत्कृतमंदननिभोवेदनांकरोति शुश्रुतेतत्रयंदोषत्रयजः पठितः यथांतमांगरुजात्यत्रमात्रसतोदभेदभ्रममोहशूलैः
पक्षाद्दशाहादथवाप्यकस्मात्तस्यार्धतमेदंत्रितयाद्व्यवस्येत इतिअत्रतुकेवलोनिलः सकफइत्युक्तं सोर्द्धावभेदकः सकफोनिकफादिति
विदेहेप्ययंवमदकोबोद्धव्यं आयुमुपेक्षमाणोप्रवृद्धश्चोनेहंति शंखकमाह पित्तरक्तानिलादुष्टाशंखदेशेतिमूर्छितः तीव्ररुक्दाहरागाहि
शोथंकुर्वंतिदारुणं १५ शशिरोविषवद्वेगात्ररुध्याशुगलंतथा त्रिरात्राजीवितुंहंतिशंखकोनामतःपरं त्र्यहाज्जीवतिभैषज्यंप्रत्याख्येय
समाचरेत् मूर्छिताःप्रवृद्धाःसंरब्धास्तेवायुरुदीर्णविगः कृतोनुयातः कफपित्तलिंगैरितिशुश्रुतवचनात् कफाप्यत्रावगंतव्यः त्रिरात्रास
रतोजीवनंहंति त्रिरात्रंकुशलैर्वैद्याधिष्टिताजीवति त्र्यहादिति त्र्यहंप्राप्य भेद्रेप्युक्तं कुशलेनप्रक्रांतत्रिरात्रात्संजीवति इतिएवंशुश्रु

30

तोक्तादशशिरोरोगाःउक्ताः अनंतवातस्त्राधिकः इत्यातंकदर्पणेनिदानव्याख्यायांशिरोरोगनिदानं॥ ॥ ॥अथतुप्रदरनि
दानारंभः तस्यनिदानमाह विरुध्यमध्याध्यशनादजीर्णात्गर्भप्रतापात् अतिमैथुनाच्च यानाध्वशोकादतिकर्शनाच्च भाराभिघाताच्छ
यनादिवाच्च १ असृग्दरंभवेत्सर्वंसांगमर्दसवेदनं विरुध्यमद्यंव्यापत्तमद्यंकिंवाविरुद्धंक्षिमत्स्यादिमध्यंच अध्यशनंभुक्तोपरिभोजनं अ
सृग्दरंअर्तवातिप्रवृत्तिः तस्यसंख्याप्रतिनाह तच्चश्लेष्मपित्तानिलसन्निपातैश्चतुःप्रकारंप्रवदंतिवृद्धाः २ तत्रश्लेष्मजमाह अमंसपिच्छ
प्रतिमंसपांडुपुलाकतोयपुलाकतोयप्रतिमं कफाच्च यस्याल्पयैमंडस्तत्तुल्यंपिच्छलमित्यर्थः पुलकातोयप्रतिमंगंवधुकाभ्रवारिवत् पृष
रसंअन्येपुलाकंतुधान्यमाहुः पीत्तजमाह सपित्तजंनिलासीतरक्तयुष्णंपितार्तियुक्तं १२ सोमेतिपित्तात् वातिकमाह रुक्षारुणंवानिलम
ल्पमल्पंवातार्तिवातासिशितोदकाभं ३ मिश्रितोदकवर्णः त्रिदोषजमाह सक्षौद्रपिंडरितालवर्णं मज्जाप्रकाशंकुणपंयंत्रिदोषं ३ तं
चाप्यसाध्यंप्रवदंतितज्ज्ञानतत्रकुर्वीत भिषक्चिकित्सां क्षौद्रवर्णमिनाकपिलंसर्पिर्वैणंविनीनघ्ननवत् हरितालवर्णंपितामज्जाप्र
काशंमज्जास्थिस्नेहः तत्समंकुणपंशवगंधि तंचापिसाध्यमिति चिकित्सानिवृत्त्यर्थंशुद्धावलक्षणमाह मासात्पिच्छदाहार्तिः पंच
रात्रानुबंधीव नैवातिवाहुनात्यल्पमार्तवंशुद्धमादिशेत् ५ अपिच्छदाहार्तिअपिच्छलंमदाहांअभूलादिवेदनाएतेनविकृतादिलक्ष
णमित्यर्थः अल्पवृत्यापंचरात्र्यासरतोध्यनुबध्नाति यदुक्तंहरितेशोडशादिवासादनुकालइति वाराहोप्युक्तवान् स्त्रीणास्तुभ
वतिशोडशवासराणि पुनश्चशुद्धलक्षणमाह शशाभ्रकृप्रतियद्धालाक्षारसोपमंतदार्तवंप्रसंसंति यत्वापक्रवविरज्यते ६ वर्णद
याभिधानंवातादिप्रकृतिभेदेनवर्णभेदात् यत्वापरूनविरज्यतइति यदार्तवकर्पटगतंसततजलेषुसंयुज्यमानेषु नविरज्य
तेनविवर्णभवति अयंमित्यर्थः यद्दोतंसहासोनविरंजयति यदुक्तंहरिणीक्षिइंद्रगोपकसंकाशांस्निग्धंरामधुगांधसा अपिच्छलम
सीतंच यद्वासोनविरंजजयेदिति॥इत्यातंकदर्पणेनिदानव्याख्यायांअसृग्दरनिदानं॥ ॥योनिप्रदरत्वादसृग्दरस्या
नंतरयोनिव्यापन्निदानमाह विंशतिर्व्यापदोयोनेर्निर्दिष्टारोगसंग्रहे मिथ्याचारतःस्त्रीणांप्रदुष्टेनार्तवेनच जायंतेबिजदो
षाच्चदैवाच्छृणुतत्पृथक् १ व्यापदोरोगाः रोगसंग्रहइति अष्टोदवरीयेचरकोक्तैः मिथ्याचारतः अगम्यगाहोराचारतः प्रदुष्ट
नार्तवेनेतकुपितावातादिदुष्टेनार्तवेनवंध्यासआर्तवदुष्टिरपी कारणंभवतीबीजदोषादितिगर्भारंभकबीजगतार्तवदोषात् दैवा
दितिदैवेसर्वत्रसाधारणंविशिष्टदृष्टकारणाःदर्शनेसतिकार्यवर्तनादुत्त्रेयं पूर्वयोनेविंशतिव्यापदयुक्तास्तासुउदावृतामाह कफ

निलउदावर्तारजः कृच्छ्रेणमुंचति २ उर्ध्वंआसमंतात्कारेणावृतवर्तुलोवायोर्विनीर्यवत्रसतथा उदावर्तनपाठांतरे तत्रयमेवार्थः सयोनिः
फेनेनार्तमुंचति वंध्यमाह वंध्यानष्टार्तवाज्ञेयानष्टमार्तवंयज्ञोयस्यासातथा विप्लुतामाह विप्लुतांनित्यवेदनां २ वातवेदविप्लुतत्वा
त्रिवेदनांवातजनिततोदादिवेदनायुक्तं परिप्लुतामाह परिप्लुतायांभवतिग्राम्यधर्मरुजाभृशं परिसर्वतोवातविकारोपरिप्लुतता
परिप्लुतातिसंज्ञाग्राम्यधर्मेमैथुनंभृशंपीडाभवति ग्राम्यधर्मेरुचिरितिपाठांतरंतत्रारतिचिनभिलाषः वातलामाह वातलाकर्कशास्तब्धाभू
लनिस्तोदपीडिता ३ वातलेतियोनिविशेषणं वातलयासहपंचयोनिव्यापदः वातलेतिपृथक् विधानंअत्यर्थवातवेदनाप्रादुर्भावार्थं एवंपि
त्तलादिष्वपिव्याख्येयं अथासुच्यतेस्फुवातानुबंधमाह चतुस्र्वपिचाद्यास्कभवंत्यनिलवेदनाप्रादुर्भावार्थं एवंपित्तलादिष्वपिव्याख्येयं
अथासुच्यतेस्फुवातानुबंधमाह चतुस्र्वपिचाद्यास्कभवंत्यनिलवेदना उदावर्तावंध्याविप्लुतापरिप्लुताचस्फुवातवेदनाज्ञेया वातला
यामधिकसंज्ञा अथपित्तानुबंधिन्यः तत्ररक्तक्षयामाह सदाहंक्षीयतेरक्तंयस्यासालोहितक्षया ४ अतिप्रवृत्यारक्तस्यक्षयतेनरक्तक्ष
यनिसंज्ञा वामिनीमाह प्रस्रंसिनिस्रवसेतुक्षोभिताः दुःप्रजाइति भ्रंसतेस्वस्थानाच्यवतेनिःसरतीत्यर्थः क्षोभितातिमर्दिता दुःप्र
जाविनीदुःप्रसवा पुत्रघ्नीमाह स्थितंस्थितंहंतिगर्भंपुत्रघ्नीरक्तसंक्षयात् अत्रपुत्रघ्नीतिसर्वाअपिअपत्यविनाशित्यस्तथापिपुत्र
स्यप्राधान्यात्पुत्रघ्नीतिव्यपदेशः पित्तलामाह अत्यर्थंपित्तलायोनिदाहपाकज्वरान्विता दाहपाकज्वरान्वितेतिउपलक्षणंतेननीलपी
तशीतार्तवाभवति सवगंतव्यं तत्राचतत्रांतरे व्याप्तु ... लुव्यंहृल्लक्षरोदाः पित्तजाभवेत दाहपाकज्वरोष्णार्ता नीलपीतसितार्तवा
ति चतस्र्वपिपित्तानुबंधमाह चतस्र्वपिचाद्यास्कपित्तलिंगोच्छ्रयोभवेत् रक्तक्षयावामीनीप्रभ्रंशिनीपुत्रघ्नीपुपित्तलयासहपंचपि
त्तानुबंधिन्यः अथश्लेष्मानुबंधिन्यः तत्रानंदास्यामाह अत्यानंदानसंतोषंग्राम्यधर्मेणगच्छति कर्णिन्यांकर्णिकायोनौश्लेष्मास्र
ग्भ्यांप्रजायते ६ कर्णिकेतिमांसकन्याकारायांग्रंथिमैथुनचरणापूर्वंपुरुषादितिस्विन्न अधिकाभवतीत्यर्थः अतिचरणमाह बहुशा
श्चातिचरणात्तयोर्बीजंनविंदति बहुशोमैथुनाचरणादतिचरणासावश्लेष्मजनितकंडूयोगाद्धिमैथुनान्वरणादतिचरणबीजगर्भांकु
रजननंलक्ष्यते अतएवोक्तं तयोर्बीजंनविंदतीति तयोरितिचरणातिचरणतयोः श्लेष्मलामाह श्लेष्मलापिच्छिलापिच्छिलायोनिःक
ण्डूग्रस्तातिशीतला ७ अतिशीतलेत्युपलक्षणं तेनवेदनेत्यपिबोद्धव्यं यदुक्तंतत्रांतरे कफाभिष्यंदिभिर्वृद्धोयोनिंदूषयतेस्त्रियः सकु
र्यात्पिच्छिलांशीतांकंडूग्रस्तांसवेदनामिति चतस्र्वपिश्लेष्मानुबंधमाह चतस्र्वपिचाद्यासुश्लेष्मलिंगोच्छ्रयोभवेत् अत्यनंदाकर्णि

307/1912

नीचरणातिचरणास्र एवंश्लेष्मानुबंधिन्यः पंचसन्निपातजाः पंचतत्रषंढीमाह अनार्तवाअजरस्काअस्तनीद्वषत्वस्तनी अंडिनीमाह
अतिकायगृहीतायास्तरुण्यैखंडिनीभवेत् अतिकायोबृहः पुरुषस्तेनगृहीतायास्तरुण्याग्रहीतायाइतिअप्रगल्भायाः अंडीभंडवति
स्तनायोतिः विवृतामाह विवृतातिमहायोनिनिः अतिविवृतमुखीविवृतासूचीवक्रातुसंवृता ९ — — — पंचसा तथाप्यितत्रस्र
ष्वपिसंबंधिलिंगानुबंधमाह चतस्र्वपिचाद्यास्कसर्वदोषोद्भवेत् १० षंढीअंडिनीविवृतासूचिवक्रात्रिदोषजाः पंचअसाम साध्यनामा
ह पंचसाध्याभवंतिहियोन्यपः सर्वदोषजाः रुगमं इहैवयोनिसंस्रवन्यनयोनिकंदनिदानमाह दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुना
त् क्षताच्चनखदंतोदैर्वाताद्याः कुपितास्त्रयः ११ पूयशोणितसंकाशंलकुचाकृतिसन्निभं जनयंतितदायोनौनाम्नाकंदस्तयोनिजा १२
दंतनखोद्यैरित्युपलक्षणं आदिग्रहणादतकंटकादिपरिग्रहाः वाताद्याः कुपिताइतियथानिदानेनवाताद्यः प्रत्येककुपिताः लकुचाकृ
तिसन्निभमित्यस्यानंतरं गुह्यकर्मितिद्रष्टव्यः कदाचरनारियोनिगतोलकुचाकरोः वातजमाह रूक्षंविवर्णंस्फुटितंवातिकंतंविनिर्दिशे
त् १३ रुगमंश्लैष्मिकमाह नीलपुष्पप्रतिकाशंकंडुमंतंकफात्मकं १४ अतसिकुसुमादिवर्णएवंविधवर्णताचकफजेपिप्रभावात् अन्येतेन
पैत्तिकंएवंसंबध्नंतियोग्यत्वात् सन्निपातिकमाह सर्वलिंगसमानयुक्तंसन्निपातात्मकंवदेत् १५ रुगमं॥इत्यातंकदर्पणेनिदानव्याख्यायां
योनिव्यापद्योनिकंदरोगनिदानं॥ ॥स्त्रीविकाराधिकारात् स्त्रीरोगनिदानानंतरंमूढगर्भनिदानारंभः तत्रगर्भहेतुमाह भयाभिघा
ताक्रांतोक्ष्णौष्णत्यानाद्यानिरोधना गर्भपततिरक्तस्यसशूलंदर्शनंभवेत् १ भयोरेकश्चिच्छिरपरिवर्जिनिकुब्जदेहः एकेनकश्चिदपरस्तभुज
द्वयेनतीर्यक्तोभवतिकश्चिदवास्पुवोन्यः पार्श्वप्रवृत्तिकश्चिदवाङ्मुखोन्यः पार्श्वोप्रवृत्तिगतिरितिनियंवकश्चिदष्टधागतिरिमाह परास्वतुधा
विपुलेनशिरसायोनिमुखंपिधायलग्नाभवतिइत्येकः प्रकारः अपरोध्यानेनजठरोदरेणयोनिद्वारंपिधायशक्तोभवतीयद्वितीयप्रकारः क
श्चिच्छिरपरिवर्तनेनविपरीतवर्तितेनकुब्जदेहः शक्तोभवति अनेनत्वांतःकुब्जवृत्ताकुब्जयोःपरिग्रहः अयंतृतीयप्रकारः कश्चिदेहेनबाहु
नाइत्विचतुर्थप्रकारः अपरोबहुहृदयेननिपंचमप्रकारः एवमष्टधागतिर्भवति गर्भस्यचतुःप्रकाराःनानाह सर्वकीलकः योनिमितियोनिंप्रति प्र
तिखुरमाह हश्येयखुरेः प्रतिखुरः सहिकायसंगीखुरसाधर्म्यात् उरशब्देनकरपादाउच्यंते तेनकरपादोर्बहिर्गतः प्रतिखुरःकायसंगीतिका
यलग्नः बीजकमाह गुजेद्वजः द्वयशिरः श्तबीजकाख्यः भुजद्वयोपरिहितशिरोयस्यसतथाभूतः सनयोगच्छत्सबीजकं परिघमाह यो
नौस्थितःसपरिघधेनुतुल्यः योनौपरिघवदर्गलावतिष्ठतिसपरिप्रतिकाठोपमः स्थित्यासंकीर्णइतिसंज्ञिता अधःपार्श्वगतोवापितेषि

वाकुंचितोऽपि च योनिस्स्युमुखं योनेर्ज्ञेयः प्रतिखुरस्तुसः योनिद्वारानुनिर्गच्छपश्चैकादिशिरोभुजः तमाहबीजकंनाममूलगर्भविविकिल्पकं योनि
मावृत्य प्रतिष्ठेपरिघो गोपुरं यथा तथा गर्भमायांतिविद्यात्परिघसंज्ञितमिति असाध्यमूढगर्भगर्भिण्योर्लक्षणमाह अपविद्धशिरायां
तुशीतांगीनिरपत्रपा निलोद्धतशिराहंतिसगर्भंस्वतांतथा ३ अपविद्धशिरा: शिराधारयितुमशक्या: अवनतशिराइतिगदाधर: निरपत्रपा
लज्जारहिता: निलोद्धतशिरेति नीलाउद्गता: शिराकुक्षौयस्या: सतथासागर्भंहंतिसंचैतिसगर्भस्तामित्यर्थ: अत: स्तस्यगर्भस्यपरिपा
षअकर्षणार्थंलक्षणमाह गर्भास्पंदनभाविनांप्रनाश: श्यावपांडुता: भवेदुछ्वासपूतित्वंशूनतांनस्ततोशिशौ ४ गर्भास्पंदनंगानस्याचल
त्वं अवीनांप्राणाशइतिप्रसवेवेदनानामभाव: अथवाअविशब्देनप्रभवलिंगानिभण्यंते तानिचमूत्रकफप्रसेकादीनितेषांनाश: शून
तेतिउच्छूनता तस्यांतर्गतमानसागंतुजव्याधिसंदेनविविधंमरणहेतुमाह मनसागंतुभिर्मातुरुपतापै: प्रपीडिता: गर्भोव्यापद्यतेकु
क्षौव्याधिभिश्चप्रपीडिता: ५ उपतापैरितिदु:खैस्तथामातुर्व्याधिभिरपिपीडिता: अपरमसाध्यगर्भिणीलक्षणमाह योनि:संवरण:
संग: कुक्षौमक्कलमेवच हन्युस्त्रियंमूढगर्भायथोक्ताश्चाप्युपद्रवा: योनि:संवरणंसतिनिवृतेनगर्भोयदारुणद्विगदागर्भ: कुक्षौसंकोभव
तिससंग: कुक्षाविति मक्कलस्तमारुतज: शूलविशेष: योनिसंवरणमत्रांतररोगविशेष: तद्यथा वातलाद्यन्नपानानिग्राम्यधर्मप्रजा
गर अत्यर्थंसेव्यमानायांगर्भिण्यांयोनिमार्गग: मातरिश्वाप्रकुपितो योनिद्वारस्यसंवृति: प्रकुरुतेरुर्ध्वमार्गोद्यमुनरंतर्गतोऽनिल: निरुण
द्धाशयद्वारंपीडयद्गर्भसंस्थिति निरुणद्धदनोच्छ्वासमगर्भश्चाशुविपद्यते वध्वासंवध्वहृदयंनाशयत्यपिगर्भिणी योनिसंवरणंनामव्याधि
मेनंसुदारुणं अंतकप्रतिमंघोरंनारभेतुचिकित्सितमिति यथोक्ताश्चाप्युपद्रवाइतिनेपुनराक्षेपकंकासश्वासादय: ॥ ॥
इत्यातंकदर्पणेनिदानव्याख्यायांमूढगर्भनिदानं॥ ॥ ॥सूतिकायामक्कलशूलमाह वायु:प्रकुपित: कुर्यात्संरुध्यरुधिरंच्युतं
सूतायाहृच्छिरोवस्तिशूलंमक्कलसंज्ञितं १ यद्यपिसूतायाः शूलंमक्कलमुक्तं यदुक्तंसुश्रुते प्रसूतायाश्चोत्तरक्षा संतीक्ष्णोरक्तशोषि
तेशरीरंमक्कलंकरोतीति यथापिप्रसूतायाश्चेतिचकारेण प्रसूतायाअतिशूलंमक्कलमिति सूतिकारोगलक्षणमाह अंगमर्दोज्वर:
कंपापिपासागुरुगात्रता शोथ:शूलातिसारौचसूतिकारोगलक्षणं २ मिथ्योपारात्संक्लेशाद्विषमाजीर्णभोजनात् सूतिकायाश्चये
रोगाजायंतेपरमदारुणा: ३ ज्वरातिसारश्वसनथाशूलानाहबलक्षय: तंद्रारुचिमसकाद्ये: कफवातमयोद्भवा: ४ कृच्छ्रसाध्याहिते
रोगा: क्षीणमांसबलान्वित: तेसर्वेसूतिकानाम्नारोगास्तेचाप्युपद्रवा: ५ सूतिकारोगास्वलक्षणंसूतिकारोगलक्षणं अंगमर्दादि

309/1912

व्यतिरिक्तस्यरोगानभिधानात् एतेअंगमर्दादय: प्रायेणसूतिकायांभवतिरोगास्तेनलक्षणमित्यर्थ: क्लिश्यतेउत्क्लिश्यतेदोषैनेनेति
तिसंक्लेशो दोषपक्रमक मन्नंविषमाजीर्णभोजनादितिविषमभोजनात् अजीर्णभोजनाच्च ज्वरातिसारादीनामंगमर्दादिभ्य: पृथक् पुन
र्वाख्यानंत्वमुपद्रवत्वंव्याख्यायपितुंकफवातमयोद्भवाइति तत्रारुचिकाप्रसेकाद्याइत्यस्यविशेषणंकफवातजेविकारेसतियेषामु
द्भवस्तेस्तथा तेचारुचिप्रसेकाद्याइत्यस्यविशेषणं कफवातजेविकारेसतिएषामुद्भवस्तेस्तथा तेचारुचिप्रसेकादय: कृच्छ्रसाध्याइत्य
र्थ: तेसर्वेसूतिकानाम्नेतिज्वरातीसारादय: सर्वेसूतिकाभवत्वेनाश्रयाश्रियमयोरभेददोषाच्चारासूतिकानम्नाउच्यंतेतचाप्युपद्रवाइति
तेउपद्रवाभवंति उक्तानांरोगाणांअन्यतमंप्रधानिकृत्य॥इत्यातंकदर्पणेनिदानव्याख्यायांसूतिकारोगनिदानं॥ ॥सूतिकारो
गाधिकारात् स्तनरोगाउच्यंते परिभाषिकीस्तनरोगसंप्राप्तिमाह सक्षीरौवाप्यक्षीरौवादोषैप्राप्यस्तनौस्त्रियाः प्रदूष्यमांसरुधिर
स्तनरोगायकल्पते सक्षीणइतिगर्भत्यासक्षीरो आक्षीरोचेत देहयोजवनप्रसूतायांस्तनौप्राप्येतिविवृतधमनीमुखेनप्रविश्य स्त
नरोगशब्देनात्रस्तनकामइतिप्रसिद्धोरोगउच्यंते तेषांवातपित्तकफसन्निपातागंतुजानामिति देशेनलक्षणमाह पंचानामपितेषां
हिरक्तजंविद्रधिंविना लक्षणानिसमानानिवाह्याविद्रधिलक्षणै: क्रमं॥इत्यातंकदर्पणेनिदानव्याख्यायांस्तनरोगनिदानं। ॥
आगंतुस्तनरोगाभिप्रायेनशल्यनवस्तनाश्रितत्वेनस्तन्यस्यदुष्टमानापि तस्यज्ञानलक्षणमाह रोगोरव्ययस्वदुष्टानिचाग्निदीपनंक्रमा
मं तालुकंटकमाह तालुमांसेकफ:क्रुद्ध: कुरुतेतालुकंटकं तेनतालुप्रदेशस्यनिम्नतामूर्द्धितायते १ कुरुतेकंटकाकारत्वनतालुच्चकं
टकं निम्नतागर्गताकारतालुपातमाह तालुपानस्तनद्वेष: कृच्छ्रात्यानंशकृद्द्रवं तृडक्षिकंठास्यरुजाग्रीवादुर्द्धरतामपि तालुपातांग्या
रोगा: तालुन:पान:संश्रयंयत्रसतथाकृच्छ्रात्पानमितियत्रस्तनस्येतिशेष: साकृद्द्रव: भिन्नपुरीषता ग्रीवादुर्धरतेग्रीवायादुर्वहनशावत्
कृच्छ्राकुरुछसर्वांग: पितदुष्टंपय:पिबेत् तृष्णालुतृष्णावान्श्लेष्मदुष्टस्तन्यपीतलक्षणमाह कफदुष्टंपिबेत्क्षीरंलालालु: श्लेष्मरोग
वान् निद्रार्द्दितोजड:शूनवक्त्राक्षश्छर्दिन: शिशु: २ लालालु: लालावान्छर्दनइतिछर्दवान्तिकार: शिरोवक्त्रुमस्मस्यातस्यवेदना
नोपायमात् शिशोस्तीव्रमतीव्रांचरोदरनालक्ष्यदुष्टं श्रोतांस्यंगानिसर्वाणिपश्येद्बलान्मुहुर्मुहु: तीव्रांरुजंबहुवदनात् अतिव्रामलसचद
नालुक्षयेत्वालोमेरदुष्टस्तन्यपानात् वालस्यवर्त्मगतंकुकूनाख्यरोगमाह कुकुनक: क्षीरदोषोत्थोशूनामेववर्त्मनि जायतेनत्रनुकंडुरंच
श्रवेन्मुहु: ४ शिशु:कुर्याल्ललाटाक्षिकूटनंशावघर्षणात् नाकोनार्कप्रभांद्रष्ट्रुंनवर्त्मोन्मिलक्षमस ५ कुकुनक: शोथश्रावइतिव्यास्या
ताश्रवेन्मुहुरितिपिच्छिरक्ततियुक्तंभवतीत्यर्थ: नवर्त्मोन्मीलनक्षमइतिव्याख्यानाश्रवेन्मुहुरितिपिच्छिरक्ततियुक्तंभवतीत्यर्थ: नवर्त्मेवा

लनेपदुः परिगार्भिकमाह मातुःकुमारोगर्भिण्यास्तन्यंप्रायः पिबंन्नपि कासाग्निसादवमथुतंद्रीकाश्यारुचिभ्रमैः युज्यतेकोष्ठवृद्ध्याचतमा
हुः परिगर्भिकं ५ पिबन्नपिशब्दात् अपिबन्नपीत्याहुः उपशयेनतस्यज्ञानमाह रोगंपरिभावाख्येहिदधातदग्निदीपनं ६ सगमं तालुकंट
कमाह तालुमध्येकफःकुद्धः कुरुतेतालुकंटकं तेनतालुप्रदेशस्यनिम्नतामूर्ध्निजायते कंटकाकारत्वेनशातालुकं निम्नत्वं गततालुमाह
तालुपातेस्तनद्वेषः कृच्छ्रात्पानंकृच्छ्द्रवः नडक्षिकंटकस्यरुजाग्रीवादुर्धरतावमिः ७ तालुपाताख्योरोगः तालुनःपातः संश्रयोयत्रस
तथा कृच्छ्रात्पानमित्यत्रस्तनस्येतिशेषः शकृद्रवंभिन्नपुरीषताग्रीवादूर्ध्वरता ग्रीवायाःदुःखेनधारणं वमिःस्तन्यस्यवातिः महापद्म
नामानंविसर्प्यमाह विसर्प्यस्तुशिशोःप्राणनाशोबस्तिशिरःपन्नः पद्मवर्णोमहापद्मोरोगोदोषत्रयोद्भवः ८ यथास्तिशीर्षजइति व
स्तिजः शीर्षजःशीर्षशिरः पद्मंपद्मवर्णइतिलोहितपद्मवर्णःशंखाभ्यांहृदयंगत्वाउदेयातीत्यर्थः वाशब्दश्चाप्यवस्थितः वचनौ
अन्योद्दोविकारोबालानांभवनस्तानाह क्षुद्ररोगेच कथिते अजगल्लिकपूतनेस्त्रिधस्वर्णेत्यादिनाऽजगाल्लिकाकंडूयनाततः क्षिप्रमि
त्यादिनाहिपूतनंअन्येविकाराबालानांभवतिदेशेह तानाह ज्वराद्याव्याधयः सर्वेमहांतोयपुरेरिताः बालदेहेपितेतद्दिज्ञेयाः कुशलैः
सदा ९ तेनतद्देदिति तेहरादयस्तादृशोज्ञेयाः इत्यर्थः प्रायेणशौचभ्रंशादिनास्कंदग्रहादयोनवबालांस्कांविशंतितत्परिज्ञानार्थं सामान्य
लक्षणंविशेषलक्षणं व्याचष्टे तत्रसामान्यलक्षणमाह क्षणादुद्विजतेबालःक्षणाद्ग्रसतिरोदिति नखैर्दन्तैर्दारयतिधात्रीमातरमेवच उ
र्ध्वंनिरीक्षतेदंतान्खादेत्कूजतिजृंभयेत् १० भुवौक्षिपतिदंष्टौफेनंवमतिचासकृत् क्षीमोतिनिशाजागतिश्रूनांगोभिन्नविट्स्वरः
११ मत्स्यशोणितगंधश्चनचांश्नातियथापुरा सामान्यंग्रहदुष्टानांलक्षणंसमुदाहृतं १२ एतेग्रहाः पूजाहेतविबालान्ग्रसंतिय
दुक्तंचरके धात्रीमात्रोःप्राकृपचान्शौचाऽपन्नष्टानमंगलाचारहीनान् प्राकूप्रदिष्टातर्जितान्तांडितांश्चपूजाहेतोहिंसत्तान्रुष्टान्स्यु
रेतकुमारेतकुमारान् उद्विजतिइतिउद्विग्नोभवति ननुविभेतिसामर्थ्यः ग्रसतीत्युक्त्वानुकूजतिआर्तनादंकरोति भ्रुवौपक्षतिभ्रू
मंगंकरोतिदंतौष्टमित्यत्रक्षयतीतिसंबंध्यते क्षपयतिखादयतिधातुनामनेकार्थत्वात् भिन्नविट्स्वरइतिद्रवविट्भिन्नस्वरः स्वर
भेदवान्मत्स्यशोणितगंधिः नचाश्नातीतिपूर्ववत्सन्नंभक्षयतीत्यर्थः एतत्सर्वत्रयाणांसामान्यलक्षणंविशेषः लिंगंतत्रस्कंध
ग्रहग्रहीतलक्षणमाह एकनेत्रस्यगात्रस्यश्रावंस्यंदनंकंपनं ऊर्ध्वदृष्टानिरीक्ष्येतवक्त्रास्यारक्तगंधिकः दंतान्खादतिविश्रस्तस्तन्यं
नैवाभिनंदति स्कंधग्रहग्रहीतानांरोदनंचाल्पमेवच वामनेत्रस्यदक्षिणस्यविश्रावः विश्रुतिः प्रभावात्गात्रस्यविश्रावः प्रस्वेदावुप

3/1/1912

तिज्ञानंकर्तव्यं परंसर्पादिसंभवमितिपरंजंगमंशाद्याधिष्टानंतद्यथा दृष्टिः निश्वासमंदष्ट्रानखमूत्रपुरीषशुक्रलालार्तमुखसंदंशवि
त्पर्दितगुदास्थिपित्तश्रूकशवान् विशार्दितपायुकेतकुशितशब्दः तत्रदृष्टिः निश्वासविषादिव्यसर्पाभौमादंष्ट्राविषाः सर्पलादयोमु
खस्यंदंशादंष्ट्राविसर्जितगुदपुरीषविषाः विषाहनास्थिमरणास्थिप्रकृतयास्थिविषाकुशालीनाममत्स्यादयः पित्तविषाः मूषमत्
डाभटयादयः शूकविषाः कीटदहवशासविषाइतिलोषविशुश्रुत कल्पनाश्थानेविस्तारादृष्टव्यः मार्जारमकरव्याघ्रादयः लाला
विषाःसिचिटकोटिण्यादयः पुरीषमूत्रविषाः सर्वलालादयोविषा तत्रजंगमस्यसामान्यलक्षणमाह निद्रातंद्राक्लमोदाहसंपाकलो
महर्षणः शोफश्चैवातिसारंचकुरुतेजंगमंविषं २ संपाकस्वस्थावरविषस्यसामान्येनलिंगमाह स्थावरंतुज्वरंहिक्कांदंतहर्षगलग्रहं फ
नच्छर्दरंनिश्वासमूर्च्छांविकुरुतेविषं फेनच्छर्दिरिति फेनच्छर्दिस्त्विगम्यते अत्रौशल्यस्यपरिकर्मणाविषमवचारयंतीति तथाविषा
दान्दणांलक्षणमाह इंगितज्ञामनुष्याणांवाकूचेष्टास्वरविकृतैः जानीयाद्विषदातारमेभिर्लिंगैःसबुद्धिमान् ३ जानीयात् एते
लिंगैश्चवक्ष्यमाणैः तान्येवलिंगान्याह नवदात्युत्तरंपृष्टोविविक्षुर्मोहमेतिच अपार्थंबहुसंकीर्णंभाषतेविवर्णकिंचिद्यामध्य
गनखैः किंचिच्छिनत्यपि अलभेनासानोदिनः करणंचशिरोरुहान् वर्ततेविपरीतंचविषदातातचिंतनः तस्यातीत्याह आत्मी
यस्यकर्मण्यामोहात् अथार्थमिति अपार्थकंसंकीर्णमित्युस्फुटं हसत्यकस्मादिति अट्टहासेनोत्पहसति भयजनितम
भूतपर्वव्यथापनादंगुलीस्फोटयति क्रियांतरकरणासत्वनायमहींविलखति भीततः सन्नप्रत्येकंजनंवीक्षते ध्यामइतिरुधंसम
वर्णोविवृतुणादिकंछिनत्ति वर्ततेविपरीतमिति परिवर्तवारंवारंपश्यति मूलादिविषाणांप्रमादादुपयुक्तानांप्रत्येकंलक्षणमाह
तत्रमूलविष उद्वेष्टनंमूलविषैः प्रलापोमोहएवच ८ उद्वेष्टदंशदाहमर्दनंच्छायामूलविषैरविष्टविधैरपि पत्राद्विषलक्षणमाह
जृंभांगंबमथुःश्वासोज्ञेयंपत्रविशेषुच ९ उष्णंजंभवाहुल्यफलविषलक्षणमाह मुष्कशोथः फलविषैर्दाहोन्नद्वेषएवच
मुष्कयोस्वयथुः पुष्पविषलक्षणमाह भवेत्पुष्पविषैश्छर्दिराध्मानंश्वासएवच निर्मासविषमाह त्वक्सारनिर्यासविषैरुपयुक्ति
भवंतिहि अस्यदौर्गंध्यपारुष्यशिरोरुक्कफसंश्रवाः १० त्वग्विषसविषनिर्यासविषैः पृथक्त्रिभिः पारुष्यंस्वरस्पर्शेन मुख
वैषवकफश्रावः क्षीरविषलक्षणमाह फेनागमःक्षीरविषैर्विड्भेदोगुरुजिह्वता ११ धातुविषमाह हृत्पीडनंधातुविषैर्मूर्च्छादाहश्च
तालुके ११ धातुविषैर्हरितालादिकैः एषांकालावधिमाह प्रायेणकालावधिमाह प्रायेणकालाद्घातीनिविषाण्येतानिनि
र्दिशेत् एतानिमवमूलाविषाणिकालांतरेणघ्नंति कंदविषमपिअतितीक्ष्णत्वात् विषायविकात्यादिगुणयोगात् प्रतावा
द्वासद्यएवंमारकं विषलिप्तशस्त्रएतस्यलिंगमाह सद्यःक्षयंपच्यंते यस्यजंतोश्चवक्त्रंपच्यंतचाप्यभीक्ष्णंक्लिन्नंकि

युक्तोगात्रइत्यर्थः स्यंदनंकंपनंवाभवतीत्यर्थः वक्त्रास्यंचक्रमुखंरक्तगंधीत्यनेनसामान्येनत्वधर्मपिअतिशयार्थमुक्तं एवमन्य
त्रापिसामान्यलक्षणेपुनरक्तेबोधव्यं स्कंदायस्मारलक्षणमाह नष्टसंज्ञोवमेत्येनंसंज्ञावाननिरादति पृयशोणितगंधितंस्कंदाप
स्मारलक्षणं१५ नष्टसंज्ञः स्वनुफेनंवमतिसंज्ञावानुज्ञानवानतिरादिति नष्टसंज्ञामूर्छितः शकुनीलक्षणमाह स्रस्तांगोभय
चकितोवहंगगंधिसाव्रणपरिपीडितः समंतात् स्फोटैश्चप्रतिततनुः सदाहपाकैर्विज्ञेयोभवतिविशुस्तलःशकुन्या१६ स्रस्तांगः
श्रसनूवद्यथावान्हिरण्यायिप्युक्तं साश्रावदाहपाकादेर्श्चितस्फोटैर्भयान्वितः स्रस्तांगोबस्तिगंधः स्याच्छकुनीग्रहपीडितः शि
शुरितिसाश्रावपीडितः इतिस्फोटैरेवविदीर्णैर्व्रणैरुपतापातपंत्रेः पीडितस्फोटैश्चप्रचितनतनुरिति नवस्फोटैर्व्यासःतनुस्त
नइति अभिभूतः रेवतीग्रहलक्षणमाह व्रणैस्फोटश्चितंगात्रंपंकग्रंधिश्चवरस्तक् भिन्नवर्चाहिरिदाहिरेवतीग्रहलक्षणं१७ कंकंग
धकर्दमगंधं पूतनाग्रहीलमाह अतिसारोत्करस्तृष्णातिर्यक्प्रेक्षणरोदनं नष्टनिद्रस्तथोद्विग्नः ग्रस्तः पूतनयाशिशुः१८ वसामांस
स्नेहगंधान् शीतपूतनयाग्रस्तलक्षणमाह वेपतेकासतेक्षीणनेत्ररोगोविगंधिता छर्द्यतीसारयुक्तश्चशीतपूतनयाशिशुः वसामांस
स्नेहगंधवान् मुखमंडनीकाग्रस्तमाह प्रसन्नवर्णवदनः शिराभिस्तिसंवृतः मुत्रगंधश्चबह्वाशीमुखमंडितकाग्रहेः नद्दताशिराभि
व्याप्तशराभिर्व्याप्तशरीरमुत्रइति वातस्निमूत्रगंधः बह्वाशिबहुभक्षणशीलः नैगमेयग्रहस्यलक्षणमाह छर्दिः स्यंदनकंठा
स्यशोषोमूर्छाविगंधिता उर्ध्वपश्यंस्तानैगमेयग्रहंवदेत्२० स्यंदनंलालाश्रावः अथवाद्यमांबुश्रावः ग्रहैस्तैरसाध्यासाध्यलक्षणमाह
शुश्रुतस्तब्धाक्षस्तनविद्वेषीमुह्यतेवानिशंमुहुः तंबालमचिरान्घ्नंतिग्रहाःसंपूर्णलक्षणाः विपरीतंतुसाध्यंस्याच्चिकित्सेदचिरादि
तइति॥ ॥इत्यातंकदर्पणेनिदानव्याख्यायांबालरोगनिदानं॥ ॥परिशेष्याद्विषनिदानमुच्यते तत्रद्वैविध्यमाह स्थाव
रंजंगमंचैवद्विविधंद्विषमुच्यते मूलाधात्मकमाद्यंस्यात्परंसर्पादिसंभवं मूलाद्यात्मकमाद्यं आद्यस्थावरं मूलादिस्वरूपंदशविधं य
दुक्तंसुश्रुते दशाधिष्ठानमाद्यंतुद्वितीयंशोडशाश्रयंमूलंपत्रफलंपुष्पंत्वक्क्षीरंश्चासमेवच नियासोधातवश्चैवकंदश्चदशमःस्मृताः तत्र
क्लीतनकायानितिश्चभारगुंजाभटगुरकरघारविद्युद्धिकानंतविजन्यंतामूलविषाणिविषापत्रिकालंबवरदारकरंभः महाकरंभाइति
पंचपत्रविषाणिकर्कोटिकरंभरवाद्योतकचर्मरीयकमागधमुद्वातविरहकसर्पघातिकचंदनकसारकाकोलसारनिनिद्वादशफलविषा
णिवेत्रकादंवल्लीजंरणुकास्तवमहाकरंभानितिपंचपुष्पविषाणिच आनंतयाचकर्तीरीयवल्लीकरवल्लीजंरणुकास्तवमहाकरंभानिति
पंचकरघाटकरभमदकानिसमहकसारगतिनिर्यासविषाउदधीमस्तहिज्जालक्षीरणीक्षीरविषाणिच फेनाश्महारितालंचणुक
श्याघातककुरंटवच्चद्विधारूपविशेषकालकूटवत् सनाभगसर्षकवलाहककर्दनंगकेवेरादमुस्ताकुश्रंगीविषमहाविषपुंडरी
षमूलकधांकुकालाहालमर्कटाकरीनिचयादशकंदविषाणिएवंपंचाशनस्थावरविषाणिभवंति एषांव्याधिपुलिंदादिश्यांव

3/3/1912

भ्रमित्यर्थः पूतिक्षमान्मांसंशीर्यतेयस्यचापि १२ तृष्णामूर्च्छाहृदाहोन्वयस्यदिग्धाहतंतं मनुजंव्यवस्येत् मचसाप्यक्षीक्ष्णमिति
सद्यःश्रविःफ्लवतेपश्चात् अपिपुनः पाकमितिदिग्धाहतंविषलिप्तशस्त्रहतं शत्रुभिर्व्रणमंचारितलक्षणमाह लिंगान्येतान्यकुर्या
दमित्रैर्व्रणविषयस्यदत्तप्रमादात्१३ एतान्येवपूर्वोक्तानि अमित्रैशत्रुभिर्व्रणशत्रुत्राणप्रमादानवधातु क्वांतरविषपीतलक्षणमा
ह सवातंस्हधूमाभंपुरीषंघ्नातिसार्यतः फेनभुद्वमेतवापिविषपीतंतमादिशेत्१४ इतिस्थावरमभिधायजंगमस्यातिती
क्ष्णत्वेनसर्पानाह वातपित्तकफात्मनोभोगिमंडलिनादिलाः यथाक्रमंसमाख्यातोद्यंतराद्वंद्वरूपिणाः १५ भोगिफलीमंड
लीरथांगलंगुलादिमंडलयुक्तः राजलश्चित्रलेपवान् एतेयथाक्रमंवातपित्तकफप्रकोपतयः वानकरजान्सर्पानाह द्वंद्वतराद्वं
द्वरूपिणः इतिद्वंतराद्वयोरंतरं विशेषविशेषेतत्तथाफणिनाकृच्छ्ररूपेणमंडलीन्यायोगास्यंजातः मंडलिनावांगोनसेतुनफ
णिनतृष्यसार्पिण्यारवमन्येनिजातिव्यतिकरजाउह्यः द्वंद्वरूपिणइतिद्वयोः द्वयोरग्रगतइत्यर्थः व्यनराइतिपाठेप्येतमेवार्थः
भोगिप्रभृतभेःकृतदंशेषुवातादीनांलिंगमाह दंशोभोगिकृतःकृच्छ्रः सर्ववातः विकृतिपितामंडलिजःशोथोमृदुपितवि
कारवान् राजिलाच्छोभवेदंशास्थिरशोथश्चपिच्छलः पांडुश्च्छिधातिसांद्रास्टकसर्वश्लेष्मविकासकृत्१७ सर्ववातविकारकृ
दित्यनेनकृच्छ्रत्वसिद्धेतदुक्तिश्चभवति तद्रूपार्थाख्यापनार्थंएवमुत्तरत्रापिपित्ताद्यभिधामात् विशिष्टदेशदष्टस्यासाध्य
त्वमाह अश्वत्थदेवायतनश्मशानवल्मिकसंध्यासु चतुःपथेषुयाम्येचदृष्टाः परिवर्जनीयाः ऋक्षेनराममर्मस्वेवदृष्टाः
सर्वकिरीणांविषमाशुहंतिसर्वाणिचाष्ठेद्विगुणीभवंति १८ याम्येचेतिभरण्यांमर्मस्वेति अश्विमाद्यातिषुयामेनेति
चरके आर्द्राश्लेषामघामूलाकृत्तिकाणांसमुच्चयं यदुक्तमन्यत्र वैत्यायनवल्मीकश्मशानेषुचतुपथः आर्द्राश्लेषामघामू
लाकृत्तिकाभरणीषुच पंचम्यांसंधयोर्दंशेमर्मस्वासहतेषुच कस्तेनजीवतियदिहदिसंपरइति दर्वीकराणांविषमाशुघाति
ति अश्वत्थादेविशेषेणदार्वीकरविषस्यकारकं शवएकराः फणिनः सर्वाणिचाष्ठेद्विगुणीभवंतीति उष्णसंयोगेसतिसर्वाणि
विषरूपतोद्विगुणीभवंति सर्वाणिचाकानियथाक्रमेणयथादिष्टक्रमेणोक्ताः स्तावादिषुअशुघातीनिदार्वीकरविषस्यपृथ

अपरंपुथ्यंकुपाद्यानां विशेषाभिधानार्थं अपरेषुयस्मात् घातिवंसंभवतितानाह अजीर्णपितातप्रपीडितेपुवृद्धेषुवुभुक्षितेषु क्षीणक्ष
तेमेहनकुष्ठयुतेरुक्षेबलगर्भवतिषुचापि अजीर्णेन दोषत्रयप्रकोपात् विषमाभुधातिपितातपपीडितप्रपीडितेन् क्षीणक्षतयो
रितिक्षीणक्षतोबहलवातदुष्टेमेहिनीदोषत्रयप्रकोपात् अबलेषु सहतानुक्षीणक्षतयोरिति क्षीणक्षतेवेहलवातनदुष्टेमे
हिनिदोषत्रयप्रकोपात् गर्भिभ्रूणक्लिष्टदोषत्वात् एषुविषमाशुघाजिसर्वथावर्जनीयमाह सर्वक्षतेयस्यनरक्तमस्तिराजोलनाभि
श्चनसंभवति सीताभिरद्भिश्चनरोमहर्षोविषाभिभूतं परिवर्जयेत् २० राज्यालतार्भिश्चेतिराज्योलेपालताभिस्तदुनात् नभ
वंतिलताश्चजातीलताअंगकांकायातेष्युक्तं नेतिरक्तंक्षतायस्यलताघातेनेराजिका नलोमहर्षाः शीताद्भिर्नजयितंविषार्दित
मिति अपरंवर्ज्यमाह जिह्वामुखंयस्यचकेशायातानासावसादश्चसकंठभंगः कृष्णःसरक्तःश्वयथुश्चदंशोहन्वोस्थिरत्वंचविवर्ज
नीयं २१ जिह्वांवक्त्रस्तब्धमितिकार्तिकाः कृष्णाशांतोद्दर्षाद्दर्षणात्केशोत्पाटः कंठभंगोग्रीवायाअधारणहंत्वोस्थिरत्वंहनुद
ययस्यलग्नत्वं अपरमितिवर्ज्यमाह वर्तिर्घनायस्यनिरेतिवक्त्रात्रक्तंस्रवेदूर्ध्वमधश्चयद्वूर्ध्वमधश्चेतिमुखनासागुदरोभ्यादि
भ्यश्शोणितश्वासदंष्ट्रानिपाश्वगुरुडति नवारोदंष्ट्रापदाः अन्यमपिवर्ज्यमाह उन्मतमत्यर्थमुपद्रुतवाहीनस्वरंवाप्यथवावि
वर्णं सारिष्टमत्यर्थमवेगिनंचजह्यात्नरंतत्रनकर्मकुर्यात् २३ उन्मतउन्मादवंतं करातिसारादिभिरत्यर्थमुपद्रुतंच हिनस्वरं
वक्तुमसमर्थंविवर्णंकृष्णवर्णंसारिष्टं अवेदनंप्रथमादिवेगरहितंविण्मूत्रादिवेगरहितमितिकार्तिकाः स्थावरंजंगमं
विषमेवजीर्णत्वादिभिः प्रकारैः येनदूषीविषसंज्ञांलभते तदाह जीर्णविषघ्नौषधिभिर्हतंवादावाग्निः स्वभावा
त्तद्गतिइत्यादिस्वभावस्वकिमपिविषंविकाशीव्यवाप्यादिप्रभिन्नानिपातयेत् आमंदिभूमंगादि कफान्वितंवर्षगुणा
नुबंधी तेनार्दितोभिन्नपुरीषवर्णोविरुद्धवरस्ययुतः पिपासा २५ मूर्छाभ्रमंमहुदवाग्वमीविचेष्टमानारतिमानुयाद्वा २६
ननिपातयेदितिनमारयति सर्वेरेणच कफान्वितमिति कफान्वितंसत् आमंदभूमौगादि गुणनमारयति गुणानुबंध
मारयतिसचेरेणविरस्थापीपुरातनामित्यर्थः तेनार्दितेर्दित आर्दितेनगतरूपणपीडितइतिभिन्नशब्दोत्रपुरीषवर्णो

3157/1912

भ्यामपिसंबंध्यतेतेनभिन्नावर्णोविवर्णः विरुद्धंवरस्ययुतमिति विरुद्धगंधमुखंवरस्ययुतः विचेष्टमानइतिविरुद्धचेष्टां
कुर्वन् अरतिःसुखंलभते स्थानविशेषणविशिष्टलिंगमाह अमाशयस्थेकफवातरोगी पक्वाशयस्थेनिलपित्तरोगी भव
त्समुद्ध्वस्तशिरोरुहांगोविलूनपक्षस्तुयथाविहंगः २६ कफान्वितेनवातकोपः अमाशयेतेनवातकफवातकोपइत्युक्तं
अतिलपित्तरोगीति पक्वाशयेदुष्टत्वात् वातप्रबंधनेप्रत्याशाभासयस्यपित्तस्यकोपः अमाशयेनकफवातइत्युक्तं अनि
लपित्तरोगीतिपक्वाशयेदुष्टत्वात् वातबंधनेप्रयासन्नाशयस्यपित्तस्यकोपः भवत्समुद्ध्वस्तशिरोरुहांगइति अत्रशब्दासरं
रुहशब्दोष्टत्रद्रष्टव्यं तेनायमर्थः समुद्ध्वस्तांगशिरोरुहांगरुहः अंगरुहंरोमपतितांगकोशशिरः केशाइत्यर्थः यदुक्तं
शालंकायने शीर्यंतिकोशीरोमाणितस्मिन्पक्वाशयंगतइति विलूनपक्षस्तकपक्षइत्यर्थः थाविहंगइतिपाठः त्रुटि
तइतिपक्षशाकुनिः एतेनपक्वाशयगतस्यैवलिंगं तस्यरसादिधातुगतस्यलिंगमाह स्थिरंरसादिष्वथवायथोक्तान्
करोति धातुप्रभवान्विकारान् २७ अश्रद्धादीनकरोतिकोपंचशीतत्यादिकफसंबंधात् सीतादीकालशीघ्रंकोपंयातिपू
र्वेस्तुतस्यरूपमिति निद्रागुरुत्वमिति तस्यपूर्वरूपंतदेवपूर्वरूपमाह निद्रागुरुत्वंचविलृंभणंचविश्लेषहर्षावथवांग
मर्दः ततः करोत्यन्नमदाविपाकावरोचकंमंडलकोठजन्मा २८ मांसक्षयंपादकरप्रशोथंमूर्छांतथाच्छर्दिमथातिसा
रं दूषीविषंश्वासतृषाज्वरांश्चकुर्यात्प्रवृद्धिजठरस्यापि २९ उन्मादमन्यज्जनयेत्तथान्यदानाहमन्यत्क्षपयेच्चशुक्रं
तद्वद्धंमसज्जनयेच्चकुष्टंस्तांस्तांविकारांश्चबहुप्रकारान् ३० विश्लेषहर्षावितिविश्लेषागात्रशैथिल्यं हर्षोरोमहर्षः
एतानिकफवातजानितत्तः करोतीति पूर्वरूपादीनाअन्नमदाविपाकावीति अत्रभुक्तमदोहर्षोन्मादः कार्तिकस्त अ
त्रविशेषमत्रमाह रसाजीर्णमितिगदाधरः अन्यस्यपाकाभावात् पदकरप्रशोथइति पादकरयोः प्रकर्षशोथंक
रोतीति मूर्छातथाच्छर्दिमित्यस्यस्थानेप्रलेपनं तथाच्छर्दिमतातिमारमितिपाठ तत्रप्रलेपकंपिच्छलस्वेदप्रवृत्ता
गात्रलिप्तंदरविशेषंवानानाप्रकारं यत्करोतितदाहउन्मादमित्यादिक्षपशुक्रमितिपाद्यकरोतीत्यर्थः गाढ्राग्धं

दूरवाक्यंतांस्तानिविस्फोटकारीन् दूषीविषलक्षणमाह दूषितंदेशकालान्नदिवास्वप्नैरभीक्ष्णशः शीतानील यस्मात्संदूष
येद्धातून् तस्माद्दूषीविषंस्मृतं ३१ देशः प्रचुरानिलशीतवर्षोतियः कालः शीतानीलदुर्दिनादिः अन्नंसुरातिलकुलत्थादि
तेर्दूषितं अपरंनिर्विषगरसंज्ञं यदाहवृद्धकाश्यपः संयोगजंचविविधंतृतीयंविषमुच्यते साध्यत्वमाह साध्यमात्मवतः
सद्योयाप्यंसंवत्सरोषितं दूषिविषसाध्यंस्यात्क्षीणस्याहितसेविनः आत्मात्मवतः पथ्याशिनः क्षीणस्यक्षीणधातोस्त्रयम
पिदर्शयितुमाह सौभाग्यार्थीस्त्रियः स्वेदरजोनानांगजान्मलान् शत्रुप्रयुक्तांश्चगरान्प्रयच्छन्त्यन्नमाश्रितान् ३३ तैस्यात्पां
डुः कृशोल्पाग्निर्गरश्चास्योपजायते मर्मप्रधमनाध्मानहस्तयोः शोथलक्षणं ३४ जठरंग्रहणीदोषोयक्ष्मागुल्मक्षयोद्वराः
एवंविधास्यचान्यस्यव्याधिलिंगानिनिर्दिशेत् ३५ शत्रुप्रयुक्ताः सविषोविषंजननांस्वेदरजस्सूनांनानांगजान्मलान् अनौष
ददातितैरितिस्वेदरजः प्रार्थतिभिः गरस्योपापतादिति भपाकात्तज्जठरात्सरिच्युतः स्वेदादिरगरः अतएवास्यदशामयः मर्म
प्रधमनंमर्मव्यथाशोथलक्षणमितिशोषणएवलक्षणंजठरमुदरी अन्यस्यव्याधेरितिरक्तपित्तादेः संप्रतिलूतानांघोर
विषत्वंप्रतिपादनार्थंप्रमाणमाह यस्माल्लूनंतृणंप्राप्तामुनेःप्रस्वेदबिंदवः तस्माल्लूताइत्यभाषंतसंख्ययाताश्चषोडशइति
किलश्रूयंतेपुराणेषु यत्कामदेनतोविलानुकांवेरिग्रहेणविश्वामित्रोनिपतिवशिष्टंकोपयामास तेनकुपितेनोलज्वाला
दविरादेवलोनतः ततः स्तानुशोषडशाइति यदाहसुश्रुतोवार्याचंमंडलीतथा श्वेताकपिलापीतिकातथा लालामूत्रवि
षारक्ताकाषाप्यष्टमीस्मृता सौवर्णिकालाजवर्णाजालिनीएणीपदीतथा रूक्षास्निग्धामुखीकाशमालागुल्मष्टमीतथेति अत्रय
नपदध्वंशनीयेयदाहपराशरः यदाहंप्रबलाहंकारकामक्रोधलोभादिभियुक्तैः पाषाण्डपुरःसरैर्मिथ्यादृष्टिभिः स्वकपोल
प्रकल्पितप्रपंचैरागमंभासैस्त्वपीधर्मादिलक्षमहाजनोधर्मपुपयुज्यतेनरात्तदेवमाहिनदेशनगरनिगमजनपदप्रधानधर्ममुत्क
स्याधर्मेणप्रजाप्रवर्तयंतितदाश्रिताः पौरजानपादाः व्यवहारोपजीवनश्चतंधर्ममभिवर्धयंति ततः सोधर्मः प्रसभंलतंधर्ममेव
वर्तयंति ततः श्लेष्मामंतर्हीनधर्माणांअधर्मप्रधानमुपक्रांतदेवानांतदधर्मवत् तत्कर्मणोस्मिन्हियमानाः क्रोधेनापतय्यंत तत्र

3171912

पवशाद्विषप्रज्वलंतीतीव्रनिश्वासान्मुंचति ततस्तानिश्वासकर्णिकाभीतानुनानाप्रकारल्लूतासंपाद्यंतेनैनीश्वासेननाभिरनुकालाभू
मिरापोनिलश्चदुष्यंतेतत्रपतत्तृणकंदादुद्दातः व्याधितमृगपक्षकं अहरहस्त्वष्टधर्मसत्यालज्जारहितंजनप्रजनक्षुमितांजीर्णजलाशय
प्रमत्तोल्कापात् निर्कांतभूमिकंपंसज्वलदिशंप्रतिमाचक्षते अरुणासितांभजालसंछन्नार्कचंद्रतारामलीमससंभ्रमोद्वेगमिवयत्नमिव
सतुमस्कमिवगुह्यकीचरितांक्रंदबहुलमिवकालंजानीयात् अपगतसफलकमक्षकावृतंविकृतसरीसृपव्यालांबुगोधारिकीडिविवेश
न्दणालपलेतानांतिबहुलांव्यपगतस्वभावकुसुमंनिमीलितशुष्कगलितपत्रोपवनद्रुमं लोहंशवपूतिमस्यगोमूत्रादिगंधांविकृतस्पर्श
कूदबहुलांतानाभिलूताभिदुष्टांवाक्षवतीवभूमिवद्यात् अत्यर्थविक्षतविवर्णगंधरसस्पर्शमक्रांतजलचरविहंगप्राज्ञमीनकूर्म
नक्रादकलितंनीलिकाबहुलताभिदुष्टमुदकंव्यसेत् विषमितिनित्तिमितप्रबलमितिपुरुषमितिशीतमत्युष्णमतीरूक्षमतिभि
क्ष्णंद्रुतमितिभैरवारावमतिप्रहतमपस्परगतिमनिकुडलीनमसात्म्यगंधवाप्यसितपांशुधूमोपहतंवायुंजानीयात् इत्थमेवमूर्छा
क्रोधाश्वासपिपासत्यादिरोगेभ्यश्चसारोभावाजनसंपदध्वंजनहेतवोभवंति यदातोलूतायोयंभूमध्येदेशमात्रमिति नदुष्टा
न्नशाकपयोगिनः तत्प्रदेशस्थाएवप्राणिनः द्वारितादेवपूतग्रस्ताइवोन्मताइवम्लानाइतचितपूर्णधूमिताएवोन्मताश्च
लनलाटादेवेस्तकल्प्यसात्म्यकृतयोपिकंटकवर्णामूलमर्मासंधिषुकर्कंधुकोलामलकास्थिप्रमाणाभिलसावकसंनिपा
तिमिहकरकरिणीभिः पीडिकाभिः परितानाशिकाक्षिमुखकर्णग्रीवरूपरुधिरवमितस्त्रिरात्रात्सद्यएवाविपद्यते कदानिदेके
वानुरूपाग्रविषघ्राणश्वासमार्गेणोजसः समाश्रयंधदयमासाधविनाप्यपद्रवेणसएवमारयतिकदाचित्तुभिदुष्टाप्राणिनः कावस्था
सद्यन्वारिणोवायुः वेधगाछायानाश्चतिष्टंति कदाचिदधर्मवसाद्यपगपन्नद्रानिद्रांचिता अकस्मादेवसपूतास्तिष्टंति कदाचि
दल्पविषदूषितेषुभावेषुयुगपत्कासश्वासद्रवमथुः शिरोभितापः मसूरिकाविसर्पपामादिभिर्दूष्यंते जनपदानिदेवद्वि
जगुरुशिष्टशापेवा कदाचिद्ग्रहनक्षत्रराशिव्यतिक्रमेवकदादधर्मकुपितभूतपिशाचवेताल्कृत्तादूषितानांधात्वोप
घातानासंतःकरणप्रवृत्तानांप्रविशंतिततस्तेषुयुगपद्यमांशावलोभाहंकारचदनिवारक्रोधादयोन्यंतेषुविपद्यते तदाभांति

कर्मबलिहोमदानदया सिद्धस्तोत्रमंत्रावेशाध्ययनदेवतायतनयोगालयेषुमहोत्सवयत्रापारेर्नैवितव्यंस्थानंपरित्यावा विषघ्नौ
षधमाह कश्यपेप्युक्तं बलाहकाद्याः समस्ताः कीटलूताश्चरवराः तद्विषोत्संगसंसर्गादियग्राद्यंततरतलं वाराहमिश्रे
णाप्युक्तंरलिलामलसंशोधनपरिवेष्टनमूर्तिभिः भुजंगैःफणिनमिनविषाग्निसंप्रदुष्टं भवतितद्दाधिावंगरत्युदर्शनेनति
तथावश्रुतिः यंतरिक्षेयोदिवितेभ्यः सर्पेभ्योनमइति तासांसाम्यान्यलक्षणमाह ताभिर्दष्टेदंशकोथः प्रवृत्तिः क्षतत
स्यच ज्वरोदाहोतिसारश्चरोगदास्युश्चाद्विदोषजः पिडिकाविविधाकारामंडलानिमहांतिच शोथामिहांतोम्दवोरकास्थावा
श्चलास्तथा सामान्यंसर्वभूतानांनेतदाहंसलक्षणं दंशकोथदंशपूतिभावइत्यर्थः प्रवृत्तिक्षतिर्यस्यतिरकप्रवर्तनं सर्वलू
तानामपि अस्याष्टविधसौवर्णकादिलूतानामेवसामान्यमेतदित्यभिः प्रेतादिभिर्दिष्टेशिरोदूषमित्यादिनासामान्यल
क्षणमित्यभिप्राणेनपठितमितिमंडलादयोदृष्टेविषास्तासांलक्षणमाह दंशमध्येनुयत्कृष्णंश्यावंवाजलकावृतं दुर्धाकृति
भृशंपाकानुक्लेदकोपज्वरान्वितं दूषीविषाभिभूताभिर्दुष्टमादिशेत्त दुर्धाकृतीतिऊर्ध्वगिम्बरूपीदूषीविषाभिभूताभिरिति
कालांतरेणप्रकोपविषादिर्दृष्टमिति दंशसौवर्णिकादयोष्टावसाध्यः प्राणहरास्तासांलक्षणमाह शोथःश्वेतासिनारक्तापितावि
तिपठंति तत्रपीडिकाश्चप्राणांतिकाप्राणहराः दूषीविषालक्षणमाह अरंताच्छोणितंपांडुमंडलानिज्वरोरुचिः रोमहर्षश्चदाहश्च
मूर्छादूषीविषार्दितं आतंताच्छोणितमित्यत्रगलतीतिशेषः प्राणहरमूषिकालक्षणमाह मूर्छांशोथौतिवर्णक्लेदमंदश्रुतिज्वराः
शिरोगुरुत्वंलालास्रकृच्छर्दिश्चासाध्यमूषिके अंगशोथानिमूषिकाकारोगंधशोथावाधव्या यदुक्तमन्यत्र चीयतेग्रंथिभिश्चांगमाखु
वत्सकसेरिति मंदश्रुतिः बाधीर्यंअन्येमंदारुचिरितिपठंति असाध्यमूषिकः मारणात्मकैः कृकलासदष्टलक्षणमाह कार्ष्ण्यं
श्यावत्वमथवानानावर्णत्वमेवच मोहोश्चवर्चसोभेदोदृष्टस्यस्यात्ककंटकैः वर्चसोभेदइतिसारः ककंटकः कृकलासः वृश्चि
कस्यदष्टलक्षणमाह दहत्यग्निरिवादौतुभिनत्तीवोर्ध्वमाश्रयात् वृश्चिकस्यविषयातिदंशपश्चात्तुतिष्ठति वृश्चिकदष्टस्या
साध्यलक्षणमाह दंष्ट्राअसाध्यवत्प्राणरसनोपहतानरः मांसैः पतद्भिरत्यर्थंवेदनार्तोजहात्यसून् अयं अपरोअसाध्यः

3/9/1912

प्रकारदुष्टोसाध्येस्त्विति पाठांतरे असाध्यैः सद्यएवप्राणहरैः वृश्चिकोदष्टायथोक्तलिंगैर्भवति कणभेदृष्टलक्षणमाह विसर्पश्वय
थुश्शूलंज्वरश्छर्दिस्तथापिच लक्षणेकरभिर्दष्टेर्दशश्चैवावशीर्यते कणभः कीटविशेषः शीर्यतेगलने विदिंगदृष्टलक्षणमाह
दष्टरोमांविहंगेनविहंगेनस्तब्धलिंगोभृशार्तिमान् दष्टःशीतोदकेनेवसिकान्यंगानिमन्यते दृष्टलोमाअधिकतरकृच्छलो
मा अन्येतुकृच्छलोमितिपठंति विदिंगश्चपादिकाः प्रसिद्धःस्तब्धलिंगस्तब्धमेहनः शीतोदकेनेति अन्मीयानिशीतोद
केनसिक्तान्येवमन्यते सविषमंडूकदृष्टलिंगमाह एकदंष्ट्रार्पितःशूनःसरुजः पितकस्तथा छर्दिर्निद्राचसविषैर्मंडू
कैर्दष्टलक्षणेः स्वभावादेकदंष्ट्रावार्केतोदंष्ट्रार्पितशोभवति सविषमस्यलक्षणमाह मत्स्यास्तुसविषाः कुर्युर्दाहंशो
षंतथारुजं स्कगमं सविषाजलौकादुष्टलक्षणमाह विदाहंश्वयथुंस्वेदंतोदंचग्रहगोधिका गृहगाधान्नाद्यर्णाति
लोदके अन्येत्वमअत्रवक्षणोमालक्षणंकुर्यादितिसंबंधनीयंतेनविदाहादीनांकर्मैवकुर्यात् शतपदीद
    लक्षणमाह दंशेस्वेदंरुजंदाहंकुर्याच्छदपदीविषं मशकदष्टलक्षणमाह कंडूमानमशकैरिषत्कोदःस्यान्मंदवे
दनं असाध्यकीटसदृशमसाध्यंमशकक्षतं असाध्यकीटैर्लूतादिभिः समवेदनइत्यर्थः असाध्यमशकक्षतमिति
चसमशकपुपार्वतीयमशकस्यसमसाध्यंसुश्रुतेप्युक्तं पार्वतीयैस्तुकीटैःप्राणहरैस्तुल्यलक्षणमितियत्रयकारस्तल
क्षणमाह सद्यःप्रश्नाविणीश्यामादाहामूर्छाज्वरान्विता पीडिकामक्षिकादंशोदासाच्छस्थविकासहन तासांभुश्र
तोकानां षण्णांमक्षिकानांमध्येस्थविकाश्यामक्षिका असकृत्प्राणहरीत्यर्थः चतुष्पदनिपदलक्षणमाह चतु
ष्पद्भीर्दिपदेर्दष्टंनखदंतविषंचयत् शुश्रुतेपच्यते पिश्रवतिह्वरपत्यपि विमुक्तः कीदृशोभवतितदर्शयंन्नाह प्रस
न्नदोषंविकृतिस्थः धातुमात्राभिकांसममम्नत्रविन्द्वं प्रसन्नवर्णोद्रियचित्तं चेष्टंवैद्यावराच्छेदविषंमनुष्यं सम
दोषमत्राभिकाममिति अनेनप्रकृतिस्थापिनोक्ताः यदुक्तंचरके प्रायेणोपहतापित्तात्तपिष्टमितिसार्यते प्रान्तो

निचास्यवैरस्यंनचात्रमभिनंदति समसूत्रविङ्गमिति अक्षीणाननतिरिक्तमुत्रपुरीषं अन्येसंमूत्रजिह्ममितिपठंति तदाय
मर्थः समविकृतंजिह्मामूत्रंयस्यसतथा एतेनविषदुष्टाजिह्मारसवेदिनानभवति मुत्रमपिजिह्मावत् विषप्रभावेनविकृतंभ
वतीतिप्रतिपादयती जिह्माग्रहणेनैवमुत्रग्रहणेसिद्धेतस्यरसग्रहणअनुगुणश्चप्रतिपादनर्थः अनेनचश्लोकेनसमदोषः
समाग्निश्चेत्यादिश्लोकस्यसकलएवार्थोनिबद्धइति अस्मिन्ग्रंथेरोगसंग्रहणमाह ज्वरोतिसारोग्रहणीअर्शांसीजीर्णविशू
चिका अलसश्चविलासीचक्रमिरक्तपांडुकामलाहलीमकरक्तपित्तराजयक्ष्माउरः क्षतं कासोहिक्कासहश्वासेःस्वरभेद
स्वरोचकः छर्दितृष्णावमूर्छाचरोगापानात्ययादयाः दाहात्र्यस्ततउन्मादोह्यपस्मारश्चानिलामयः वातरक्तनुरुस्तंभ
आमवातस्तथैवचश्लाभद्रवआनाहउदावर्तोथगुल्यकः हृद्रोगामुत्रकृच्छ्रंचमुत्राघातस्तथाश्मरी प्रमेहोमधुमहश्च
पीडकाश्चप्रमेहजाः मेदोदोषोदरंशोथुकफोवृद्धिश्चगलगंडजः गंडमालापचीग्रंथीरर्बुदंश्लीपदंततः विद्रधिव्रणशो
थोपिद्वौव्रणोभग्ननाडिकौ भगंदरंपदशाश्चशुकदोषत्वगामयः शीतपित्तमुदर्दश्चकोठश्चैवाम्लपित्तकः विसर्पश्चविस्फो
टः सरोमांतमसूरिका क्षुद्रास्यकर्णनाशारकुशिरस्त्रीबालकामयाः विषंचत्म्यमुर्दृश्योठग्विनिश्च्यसंग्रहे ग्रहण्य
श्चतस्रः एकस्मिन्नजीर्णविशूचिकाविकारविकातोऽनयाः मपानात्ययादयः॥पानविभ्रमादयः॥पीडिकाप्रमेहकाः मेदोदोषोरोगः॥उपदंशोमे
दृरोगः॥ --यः कुष्ठरोगः रोमांतोमसूरिकाभेदः क्षुद्ररोगः॥आस्यमुखंरुग्विनिश्चय अयंउद्देशः॥ उद्देशः कथनार्थग्रंथस्यप्रश्नमाह॥कभोषि
तंयत्रदस्तिकिंचितत्सर्वमेकीकृतमत्रयत्नादविनिश्चयः॥सर्वेरूजागणाश्री --वृंदकुरात्मजेन॥यत्कृतंस्कृतंकिंचित्वत्वेनरुग्विनि
श्चये॥मुंचंतुजतवस्तेननित्यमातंकसंगतिं २॥ इत्यातंकदर्पणनिदानव्याख्यायांरोगसंग्रहाध्यायसमाप्तः॥ ॥७५॥ ॥श्री॥ ॥

॥इतिमाधवनिदानटीका समाप्तः॥श्लोकसंख्या॥६६००॥